ष्यङः इति स्त्रीप्रत्ययग्रहणं 'न स्त्रीप्रत्यये [1]चानुपसर्जने' (सी. दे. प. २६) इति [2]प्रत्ययग्रहणपरिभाषया 'यस्मात् स विहितः [3]तदादेः' (पु. दे. प. २४) इत्येष नियमो नास्ति, तेन परमकारीषगन्ध्यायाः पुत्रः परमकारीषगन्धीपुत्रः, [4]परमकारीषगन्धीपतिः [5]इत्यपि भवति। उपसर्जने तु [6]ष्यङि न भवति। अतिक्रान्ता कारीषगन्ध्याम् अतिकारीषगन्ध्या, तस्याः पुत्रः अतिकारीषगन्ध्यपुत्रः। अतिकारीषगन्ध्यापतिः। पुत्रपत्योः केवलयोः [7]उत्तरपदयोः इदं [8]सम्प्रसारणं, [9]तदादौ तदन्ते च न भवति, कारीषगन्ध्यापुत्रकुलम्, कारीषगन्ध्यापरमपुत्रः इति। ष्यङन्ते च यद्यप्यन्ये यणः सन्ति, तथापि ष्यङः एव सम्प्रसारणं, 'निर्दिश्यमानस्यादेशा भवन्ति' (व्या. प. १०६) इति। सम्प्रसारणम् इति चाधिक्रियते 'विभाषा परेः' (६.१.४४/३३४२) इति यावत्॥

## बन्धुनि बहुव्रीहौ। (१४/१००८)

ष्यङः संप्रसारणम् इति [10]अनुवर्तते। बन्धुशब्दे उत्तरपदे बहुव्रीहौ समासे ष्यङः सम्प्रसारणं भवति। कारीषगन्ध्या बन्धुः अस्य कारीषगन्धीबन्धुः। कौमुदगन्धीबन्धुः। बहुव्रीहौ इति किम्? कारीषगन्ध्यायाः बन्धुः कारीषगन्ध्याबन्धुः। अत्रापि पूर्ववदेव। परमकारीषगन्धीबन्धुः इत्यत्र भवति। अतिकारीषगन्ध्याबन्धुः इति [11]च न भवति, तथा कारीषगन्ध्याबन्धुधनः, कारीषगन्ध्यापरमबन्धुः इति। बन्धुनि इति नपुंसकलिङ्गनिर्देशः शब्दरूपापेक्षया, पुंलिङ्गाभिधेयस्तु [12]अयं बन्धुशब्दः।

[६६२] मातच् मातृकमातृषु।

ष्यङः सम्प्रसारणं [13]भवति विभाषया बहुव्रीहावेव। कारीषगन्ध्या माता अस्य [14]इत्येवं बहुव्रीहौ [15]कृते एतस्मादेव उपसङ्ख्यानात् [16]पक्षे मातृशब्दस्य मातजादेशः[17]। तत्र चित्करणसामर्थ्याद् [18]बहुव्रीहिस्वरम् (६.२.१/३७३५) अन्तोदात्तत्वं (६.१.१६३/३७१०) बाधते। मातृमातृकशब्दयोश्च भेदेनोपादानात् 'नद्यृतश्च' (५.४.१५३/८३३) इति कबपि विकल्प्यते। [19]कारीषगन्धीमातः, कारीषगन्ध्यामातः, कारीषगन्धीमातृकः, कारीषगन्ध्यामातृकः, कारीषगन्धीमाता, कारीषगन्ध्यामाता॥

## वचिस्वपियजादीनां किति। (१५/२४०९)

सम्प्रसारणम् इति वर्तते। ष्यङः इति निवृत्तम्। वचि – 'वच परिभाषणे' (धा. पा. १०६४), 'ब्रुवो वचिः' (२.४.५३/२४५३) इति च। स्वपि – 'ञिष्वप शये' (धा. पा. १०६९)। यजादयः – 'यज देवपूजासंगतिकरणदानेषु' (धा. पा. १००३) इत्यतः प्रभृति आगणान्ताः (धा. पा. १०११)। तेषां वचिस्वपियजादीनां[20] किति प्रत्यये [21]परतः सम्प्रसारणं भवति।

---

1. अनुपसर्जनिना क. 2. प्रत्ययग्रहणेन क. 3. तदादिनियमो क. 4. परमकारीषन्ध्याः पतिः क. 5. इति सिद्धं भवति क. 6. ष्यङ् फ. 7. उत्तरपदयोः नास्ति ह. 8. सम्प्रसारणं नास्ति क. फ. 9. तेन क. फ. 10. वर्तते ग. 11. च नास्ति क, च न नास्ति ह. 12. अयं नास्ति ह. 13. भवति नास्ति ग.क.ह. 14. एवं नास्ति क. 15. कृते नास्ति ह. 16. पक्षे नास्ति ग. 17. भवति इत्यधिकम् क. ह. 18. बहुव्रीहिस्वरं बाधित्वा अन्तोदात्तत्वं भवति ह. 19. कारीषगन्धीमातः – कारीषगन्ध्यामाता नास्ति ह. 20. धातूनां इत्यधिकम् ब. क. 21. परे क.